विष्णुः । छंदस्त्वक्षरपरिगणनयात्रिष्टुभादियथायोग्यंज्ञेयं । जानन्नप्युमापातावशेषज्ञानार्थवा

र्थंवा सर्वेंद्रियप्रेरकंपृच्छतिब्रह्माणं ॥ केनेत्यादिना ॥ इषितंइष्टंसाध्वसाधुवाप्रति मनःकेनदेवेनप्रे । नेदंजीवस्वरूपंब्रह्मतत्तव

करणत्वादवश्यंकेनचित्प्रेरितमितिवाच्यं । नतावज्जीवेन । निगृह्णतोपिविषयान्प्रतिपतनात् । अ । एवमग्रेप्यर्थोध्येयः । पुरु

वाच्यं सकइतिप्रश्नाभिप्रायः । एवमग्रेपि । इषितमितीडागमःछांदसः । मुख्यवायुरस्तुमनःप्रेरः प्राणेनमुख्यवायुनानप्राणितिनचे

र्वजीवोत्तमः । प्राणोमुख्यवायुरपिकेनयुक्तःनियुक्तःप्रेरितःसन्प्रैतियाति । स्वंव्यापारंकरोतीत्यानातिकश्चिन्निरवशेषतः । नेदं य

रकोवायुरितिभावः । इमांलौकिकींवैदिकींवावाचंकेनइषितांप्रेरितांवदंतिजनाइत्यर्थः । चक्षुःयमिति । तथान्यत्प्रतिषेधार्दि रिहा

उसंबुद्धिः । भोब्रह्मन्कोदेवोयुनक्ति नियुंक्ते । कःप्रेरयतीत्यर्थः ॥ १ ॥ इतिशिवेनपृष्टोब्रह्मोत्तरंवासनामयस्थंब्रह्मविनि ॥ इहेति ॥

त्रंश्रवणशक्तिप्रदः मनसोमनःमननशक्तिप्रदः वाचोवागिंद्रियस्यवाचंवागुच्चारणशक्ति ब्रह्मत्वंविद्धिनेदंयदिदमुपचसद्भावेसाधु

ताचक्षुषःचक्षुर्दर्शनशक्तिप्रदः । श्रोत्रादेर्नियंतायस्त्वयापृष्टःसइत्यन्वेति । सउसएव प्रक्ति । तदेव।नाग्विद्धिन्येथांसाध्वनिष्टयोर्भा

उप० । हरिः ॐ । केनेषितंपततिप्रेषितंमनःकेनप्राणःप्रथमःप्रैतियुक्तः । केनेषितांवाचं॥ इहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्मह

श्रोत्रस्यश्रोत्रंमनसोमनोयद्वाचोहवाचंसउप्राणस्यप्राणः २ ॥

तलव० तदाहभाष्ये यःप्राणस्य चक्षुरादेश्च प्रणेता सविष्णुरितिधार्यतामिति । प्राणस्यप्राण
॥ २ ॥ दयोवाक्यशेषादितिसूत्रात् । तत्रप्राणादिनियंतुर्विष्णुत्वनिर्णयादितिभावः । श्रोत्रादि
धीराधीमंतः । श्रोत्रादिप्रेरकत्वंविजानंतःअस्माल्लोकाद्भौतिकदेहात्प्रेत्यनिर्गत्य मृत्वेति
तामुक्ताभवंतीति ॥ २ ॥ कीदृशंहरेःप्रेरकत्वादिमाहात्म्यंयज्ज्ञानादमृतत्वंस्यादित्यतोपरि
वतीतिभावेनाह ॥ नतत्रेति ॥ तत्रहरेर्विश्वशासनादिमाहात्म्ये । चक्षुरादींद्रियंनगच्छति
मान्युपलक्षिताःसर्वेदेवाअपिनजानंति (सामान्याकारेणापि) कात्स्न्र्येन । अतोयथायेनप्र
शिष्यात्प्रेरयेत् । तंप्रकारंवयंनविज्मनविज्मः । विसर्गलोपःछांदसः । अडागमाभावेनलङ्रूप
कुतोविशेषज्ञानमितिभावेनाह । नविजानीमइति । तदाहभाष्ये । अगम्यःसर्वदेवैश्चपरिपूर्णत
र्णत्वमित्यतोलोकंविलक्षणवस्तुत्वादितिहेतोरित्याह ॥ अन्यदेवेति ॥ तत्चक्षुराद्यगम्यंवस्तु वि
दितादप्रमिताच्छशशृंगादेश्चान्यदेव विलक्षणमेवेत्यर्थः । विदितादन्यदित्युक्तौनिःस्वरूपताशंका
दित्युक्तिः । केचिद्व्यक्ताव्यक्तजगतोन्यदित्यर्थमाहुः । अधिसर्वोत्तमइत्यर्थः । तथाचभाष्यं ।

उप० । चक्षुषश्चक्षुरतिमुच्यधीराःप्रेत्यास्माल्लोकादमृताभवंति ॥ २ ॥ नतत्रचक्षुर्गच्छतिनवाग्गच्छतिनोमनोनविज्मनविजा
तदनुशिष्यात् ॥ ३ ॥ अन्यदेवतद्विदितादथोअविदितादधि ।

वंप्रकारेणपूर्वेषांव्यासप्रभृतीनांसकाशात्शुश्रुमश्रुतवंतःस्मः । श्रवणस्यचिरकालीनत्वद्योतनायपरोक्षार्थकलिट्प्रयोगः
लिड्वा । नोस्मान्प्रतियेपूर्वेतद्ब्रह्मव्याचचक्षिरेव्याख्यातवंतःतेषांपूर्वेषामित्यन्वयः ॥ ४ ॥ ननुमनोवाग्गोचरजीवरूप
णःवाङ्मनसागोचरत्वोक्तिरयुक्तेत्यतोनतत्रचक्षुर्गच्छतीत्यादेस्तात्पर्योक्तिपूर्वकंपंचभिर्मंत्रैर्भेदमाह ॥ यद्वाचेति ॥ यद्ब्रह्म
नभ्युदितंसाकल्येननोक्तं । येनप्रेरितासतीवाक्अभ्युद्यतेपुरुषैरुच्चार्यते । तदेवत्वंब्रह्मविद्धिजानीहि । नेदंजीवस्वरूपंब्रह्मतत्तव
उपसमीपेआस तिङंतप्रतिरूपकमव्ययं आस्तेनियामकतयावर्तते । इदमेवब्रह्मेतितदेवविद्धीत्यर्थः । एवमग्रेप्यर्थोध्येयः । पुरु
षेनमनुते । मतंविज्ञातं । चक्षूंषिपश्यंतिदृश्यंतइत्यर्थः । नमनुतइत्यादौसाकल्येनेतिज्ञेयं । प्राणेनमुख्यवायुनानप्राणितिनचे
ष्टते । प्रणीयते प्रेर्यते । तदाहभाष्ये । प्राणादीनांप्रणेताचसर्ववेत्ताचसर्वशः । यंसम्यङ्नैवजानातिकश्चिन्निरवशेषतः । नेदंय
वस्वरूपंतद्ब्रह्मविष्ण्वाख्यमव्ययं । किंतुयत्तेसमीपस्थंआस तेविनियामकं । तदेवब्रह्मविद्धित्वमिति । तथान्यत्प्रतिषेधादिहा
त्रभाष्येतु यदिदंवासनामयमुपासतेध्यायंतिनेदंवासनामयंब्रह्म । किंतुतदेववाङ्मनोगोचरंवासनामयस्थंब्रह्मविद्धि ॥ इहेति ॥

उप० । इतिशुश्रुमपूर्वेषांयेनस्तद्व्याचचक्षिरे ॥ ४ ॥ यद्वाचानभ्युदितंयेनवागभ्युद्यते । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपचसद्भावेसाधु
सानमनुतेयेनाहुर्मनोमतं । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते । यच्चक्षुषानपश्यतियेनचक्षूंषिपश्यंति । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते । यच्छ्रोत्रेणनशृणोतियेनश्रोत्रमिदंश्रुतं । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते । यत्प्राणेननप्राणितियेन ॥ इहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्मह
सते ॥ ५ ॥ प्रथमःखंडः ॥ १ ॥

हितः ॥ ५ ॥ प्रथमःखंडः ॥ १ ॥ ब्रह्मसाकल्येननज्ञेयमित्युक्तमर्थंव्यनक्ति ॥ य
दब्रह्मसम्यग्जानामीतियदिमन्यसे । तर्हित्वमपिनूनंदहरमेवअल्पमेवब्रह्मणोरूपंवेत्थ ।
रमेववेत्थअथतस्मात्त्वंत्वयिव्यत्ययात्देवेषुवास्यब्रह्मणोयद्रूपं तदितिशेषः । मीमांस्यमेवविचा नुइद
नभवत्वन्येषांकात्स्र्न्येनब्रह्मज्ञानित्वं । तवतुअस्तिसम्यग्ज्ञानित्वमितिपृष्टोब्रह्मावक्ति ॥ मन्यइति ॥ अन्येसम
तिमांप्रवदंति । अहंतुब्रह्मविदितंनमन्यइतियोजना । तर्हित्वमपिसर्वथानवेत्थकिमित्यतआह ॥ नोनेति ॥ नवेदे
मीतिन । किंतुवेदचेति । ब्रह्मणःसाकल्येनाज्ञेयत्वमुपपाद्योपसंहरति ॥ योनइत्यादिना ॥ नोअस्माकंमध्येयस्तुब्रह्माहवव
वदतिसतन्नोवेद । कुतः । परिच्छिन्नत्ववेदनात् । अहंनवेदेतियो (वदति) वेदअसौवेदच । कुतः । ब्रह्मणोऽपरिच्छिन्नत्व
नात् । योनइत्यादिनासाकल्येनश्रवणागोचरत्वमुक्त्वामननागोचरत्वंचाह ॥ यस्येति ॥ यस्यब्रह्मामतंअविचारितमितिमतंबु
द्धिःतस्यपुंसोब्रह्ममतंविचारितं । अनंतत्वज्ञानात् । यस्यब्रह्म (मया) मतंविचारितमितिमतंबुद्धिःसनवेदअनंतत्वाज्ञानात्
॥ २ ॥ साक्षात्कारोपिसाकल्येननेत्याह ॥ अविज्ञातमिति ॥ वयंब्रह्मसाक्षात्कृतवंतइतिविजानतांअविज्ञातं । ब्रह्मानंत्यादि

उप० । यदिमन्यसेसुवेदेतिदहरमेवापिनूनंत्वंवेत्थब्रह्मणोरूपं । यदस्यत्वंयदस्यदेवेष्वथनुमीमांस्यमेवते ॥ १ ॥ मन्येविदितं
सुवेदेतिनोनवेदेतिवेदच । योनस्तद्वेदतद्वेदनोनवेदेतिवेदच । यस्यामतंतस्यमतंमतंयस्यनवेदसः ॥ २ ॥ अविज्ञातंविजानतांविज्ञातम

ज्ञानात् । अविजानतामुक्तरीत्याज्ञानहीनानां । नास्माभिर्ब्रह्मसम्यक्साक्षात्कृतमित्येवंजानतामितियावत् । विज्ञातं
क्षात्कृतमित्यर्थः । अनंतत्ववेदनादित्यर्थः । तदाहभाष्ये । सर्वात्मनाविजानामीतितुयस्यमतंभवेत् । तस्याज्ञातःसभगवा
मन्यतेसदा । ज्ञातस्तस्यतथास्यैवनिश्शेषंमननंकृतं । इतियोमन्यतेनास्यमतःसपुरुषोत्तमः । नातिवेद्योनचावेद्यस्तस्मा
त्तमइति । ब्रह्मणःसाकल्येनाज्ञेयत्वे कथंतेनेष्टसिद्धिरित्यतःस्वस्वयोग्यैकदेशज्ञानादेवेष्टसिद्धिरित्याह ॥ प्रतिबोधविदितमि
ति ॥ श्रुतमितिशेषः । स्वस्वयोग्यतानुसारेणपुंभिःश्रुतंमतंविचारितंविदितंब्रह्मविंदतेलभते । प्रापयतीत्यर्थतयावायोज्यं हिप्र
सिद्धं । नकश्चिद्ब्रह्मवित्सृतिमनुभवति । मुक्तोह्येवभवतीत्यादावित्यर्थः । तथाचसूत्रं । अनियमःसर्वेषामिति । ज्ञानेनामृतत्वं
विंदतेचेत्तेनैवकिंस्वयोग्यसर्वानंदप्राप्तिरित्यतोन किंतुज्ञानोत्तरकर्मणापीत्याह । आत्मनेति । आत्मशब्दोत्रज्ञानोत्तरकालीनय
ज्ञादिप्रयत्नपरः । आत्मनाआत्मीययज्ञादिप्रयत्नेनवीर्यंआनंदातिशयंविंदतेलभते । विद्ययाअपरोक्षज्ञानेनअमृतंअविद्यापरिहा
ररूपांमुक्तिंप्राप्नोतीतिविद्धीत्यनुषंगेनयोज्यं ॥ ३ ॥ अस्तुस्वयोग्यब्रह्मज्ञानमभीष्टदं तत्कदासंपादनीयमित्यतआह ॥ इहेति ॥
ज्ञानयोग्येब्राह्मणादिदेहेअवेदीच्चेत्व्यजानाच्चेद्ब्रह्मअथतर्हिसत्यमस्ति सत्यशब्दस्यसच्छब्दपर्यायत्वात्सच्छब्दस्यचसद्भावेसाधु
भावेचेतिवचनात्साध्वस्तिभद्रमस्तीत्यर्थः । इहचेन्नावेदीत्तदामहतीविनष्टिःहानिर्भवति । अतोज्ञानाज्ञानाभ्यांसाध्वनिष्टयोर्भा

उप० । प्रतिबोधविदितंमतममृतत्वंहिविंदते । आत्मनाविंदतेवीर्यंविद्ययाविंदतेमृतं ॥ ३ ॥ इहचेदवेदीदथसत्यमस्तिनचेदिहावेदीन्मह
तीविनष्टिः । भूतेषुभूतेषुविचित्यधीराःप्रेत्यास्माल्लोकादमृताभवंति ॥ ४ ॥ द्वितीयःखंडः ॥ २ ॥

वाद्धीराभूतेषुतेषुसर्वभूतेषुब्रह्मविचिंत्यज्ञात्वाअस्माल्लोकात्प्रेत्यअमृताभवंतीति ॥ ४ ॥ इतिद्वितीयःखंडः ॥ २ ॥ [illegible]
त्वाद्ब्रह्मसाकल्येनाज्ञेयमित्युक्तेर्थेकांचनाख्यायिकामाह ॥ ब्रह्मेति ॥ देवानांदैत्यदानवैर्युद्धेप्रस्तुतेसतिब्रह्मदेवानांनिमित्तं[illegible]
देवानामर्थेदैत्यादीन्विजिग्ये व्यजयत् । हेतिनिश्चितमेतदित्यर्थः । अथविजयानंतरंतस्यदेवेभ्यार्थं[illegible]ब्रह्मणोविजये[illegible]
अमहीयंतापूज्यंत । महीङ्पूजायामित्यस्मात्कंड्वादिभ्योयगितियक्प्रत्ययः । गर्विणोअभवन्नितियावत् । [illegible] । ब्रह्मणो
विजयेकुतोदेवानांगर्वइति तदेवव्यनक्ति ॥ तइति ॥ तेदेवाअस्माकमेवायंविजयोस्माकमेवायंमहिमेतिऐक्षंतव्यजानन् । [illegible]
देवानांतदसुरावेशंकृतेश्वराज्ञाननिमित्तंअहंकारादिकंविजज्ञौव्यजानात् । ब्रह्मेत्यनुषंगः ॥ १ ॥ तेभ्योदेवेभ्योर्थेदेवानां[illegible]
तत्त्वबोधाययक्षरूपतयाप्रादुर्बभूवब्रह्मेत्यर्थः । उमाशिवचतुर्मुखसहितंसदितियोज्यं । तद्यक्षरूपंब्रह्मइदंयक्षंकिमितिनव्यजानंत
नव्यजानन् । तदातेदेवाअग्निमब्रुवन् । हेजातवेदएतद्यक्षंकिमितिविजानीहीति । तथेत्युक्त्वासोग्निस्तद्यक्षंअभिआभिमुख्येना
भ्यद्रवत्अगमत् । तद्यक्षंअभिमुखगतंअग्निंकोसीत्यवदत् । अग्निरहमस्मिजातवेदाअहमस्मीत्यग्निरब्रवीत् । वैप्रसिद्धमेतन्नामम

उप० । ब्रह्महदेवेभ्योविजिग्ये । अथतस्यहब्रह्मणोविजयेदेवाअमहीयंत । तऐक्षंतअस्माकमेवायंविजयोअस्माकमेवायंमहि[illegible]
तद्धैषांविजज्ञौ ॥ १ ॥ तेभ्योहप्रादुर्बभूव । तन्नव्यजानंतकिमिदंयक्षमिति । तेग्निमब्रुवन् । जातवेदएतद्विजानीहिकिमेतद्यक्षमि[illegible]
तितदभ्यद्रवत् । तमभ्यवदत्कोसीत्यग्निर्वाअहमस्मीत्यब्रवीज्जातवेदावाअहमस्मीति ।

मेत्यर्थः । तस्मिंस्त्वयि तादृशेत्वयिकिंवीर्यमितियक्षमब्रवीत् । यदिदंपृथिव्यामस्तिसर्वमपीदंदहेयंइत्यग्निरब्रवीत् ।
एतद्दहेत्युक्त्वाकिंचित्तृणंतत्पुरतोनिदधौयक्षमित्यर्थः । तत्तृणंदग्धुंसर्वजवेनसर्ववेगेनोपप्रेयायसमीपमगमत् । गत्वात[illegible]
दग्धुं । सोग्निस्ततएव तावन्मात्रतएव । यक्षरूपमनिर्धार्यनिववृतेनिवृत्तवान् । निवृत्त्यचदेवानब्रवीत् । यदेतद्यक्षमिति [illegible]
ज्ञातुंनाशकमिति ॥ २ ॥ अथानंतरं वायुंनासिक्यवायुं । प्राग्वद्व्याख्या । आददीयआददानीत्यर्थः । तस्मात्तिरोदधे । तस्मा
त्प्रदेशादन्तर्हितमभूदितिवा । इंद्रस्याधिकबुद्धित्वान्मांप्रतिकोसीतिप्रश्नेकृतेअसुरावेशदूषितत्वेनेदानींमयाब्रह्मणाशिवेनचसा
क्षादुपदेशानर्हत्वात्तिरोदधइतिवार्थस्तस्मादित्यस्य । ब्रह्मादिभिःसहेतियोज्यं । सइंद्रस्तस्मिन्नेवयक्षतिरोधानाकाशप्रदेशएवयक्षे
णोपदेशार्थंस्थापितांस्त्रियंदृष्ट्वाजगाम । तत्समीपंप्राप्तवान् । साकेत्यतउक्तं ॥ बहुति ॥ हैमवतींहिमवत्पुत्रीं । एतद्यक्षंकिमि

उप० । तस्मिंस्त्वयिकिंवीर्यमित्यपीदंसर्वंदहेयंयदिदंपृथिव्यामिति । तस्मैतृणंनिदधावेतद्दहेति । तदुपप्रेयायसर्वजवेन । तन्नशशाकदग्धुं
सततएवनिववृते । नैतदशकंविज्ञातुंयदेतद्यक्षमिति ॥२॥ अथवायुमब्रुवन् । वायवेतद्विजानीहिकिमेतद्यक्षमिति । तथेतितदभ्यद्रवत् । तमभ्य
वदत्कोसीति । वायुर्वाअहमस्मीत्यब्रवीन्मातरिश्वावाअहमस्मीति । तस्मिंस्त्वयिकिंवीर्यमिति । अपीदंसर्वमाददीययदिदंपृथिव्यामिति । तस्मैतृणं
निदधावेतदादत्स्वेतितदुपप्रेयायसर्वजवेनतन्नशशाकादातुं । सततएवनिववृते । नैतदशकंविज्ञातुं । यदेतद्यक्षमिति । अथेंद्रमब्रुवन् । मघवन्नेत
द्विजानीहिकिमेतद्यक्षमितितथेतितदभ्यद्रवत् । तस्मात्तिरोदधे । सतस्मिन्नेवाकाशेस्त्रियमाजगामबहुशोभमानामुमांहैमवतीं । तांहोवाचकिमेतद्य
क्षमिति ॥ ३ ॥ **तृतीयःखंडः** ॥ ३ ॥

तितांदेवीमुवाच पप्रच्छेत्यर्थः ॥ ३ ॥ इतितृतीयःखंडः ॥ ३ ॥ इंद्रेणपृष्टासातद्यक्षंब्रह्मेतिहोवाच । हेतिनिश्चयमाह । एतदे तस्यदेवेष्वनुप्रविष्टस्यब्रह्मणोविजयेतद्विजयनिमित्तममहीयध्वं । महिमवंतोभवत । नत्वात्मनोविजयनिमित्तंगर्विणोभवत । वै निश्चयमेतत् । इतिचोवाचहवैइत्यन्वयः । एवमुमयोपदिष्टइंद्रःकिंचकारेत्यतआह ब्रह्माशिवंप्रति ॥ ततइति ॥ ततोहवैदेव्यु पदेशादेव । तद्यक्षंइंद्रःब्रह्मेतिदैत्यविजयोस्मदनुप्रविष्टब्रह्मकृतइत्यादिविदांचकारज्ञातवान् । तस्माद्वैतस्मादेवगर्वशून्यत्वादेव । एतेदेवाःब्रह्मवायुशेषवींद्रशिवाःसभार्याअन्यान्देवानतितरां । अन्यदेवेभ्योअधिकाइत्येकोर्थः । इवशब्दस्तुगर्वाभावादाधिक्यं अविद्यमानंदेवानांनेदानीमेवप्राप्तं किंत्वनादिसिद्धमेव । तदिदानींव्यक्तमभूदित्यभिप्रायः । अन्योर्थस्तु । तस्माद्वैयक्षतयाप्रा दुर्भूतस्यस्वरूपंविचार्यमितिप्रथममुक्तत्वादेव । एतेदेवाःकामदक्षबृहस्पतिस्वायंभुवमन्वनिरुद्धसूर्यचंद्रधर्मवरुणाअन्यान्देवानति तरामिवेतिप्रागिवास्यार्थः । तत्रापिदक्षादिभ्यःप्राग्विचार्ययक्षमित्युक्तत्वात्कामस्तेभ्योधिकइतिज्ञेयं । तृतीयोर्थस्तु । तस्माद्वैय क्षात्मब्रह्मणःपूर्वंदृष्टत्वादेव । एतेदेवाःअन्यान्देवानतितरामिवेति । एतेदेवाःकेइत्यतस्तानाह । यदग्निर्वायुरिंद्रइति । योग्निर्यो वायुर्यइंद्रइतिएतेदेवाः । वायुरत्रनासिक्योग्राह्यः ॥ १ ॥ कुतएतेअधिकाइत्यतःतस्मादित्युक्तहेतुंव्यनक्ति । तेहीति । तेहिय

उप० । ब्रह्मेतिहोवाच । ब्रह्मणोवाएतद्विजयेदेवाअमहीयध्वमिति । ततोहवैविदांचकारब्रह्मेति । तस्माद्वाएतेदेवा अतितरामि[illegible] वान्यदग्निर्वायुरिंद्रस्तेह्येनन्नेदिष्ठंपस्पृशुः ॥ १ ॥

स्मादेतद्यक्षरूपंब्रह्मनेदिष्ठंसमीपस्थं । कालतःसामीप्यमत्रध्येयं । इतरेभ्यःपूर्वकालएवपस्पृशुः । स्पृशआमर्शने । परा[illegible] तइत्यर्थः । परामर्शश्चाग्निवाय्वोर्यक्षदर्शनमात्रं । इंद्रस्यतुयक्षस्यब्रह्मत्वादिनाज्ञानंध्येयं । तद्व्यनक्ति॥तेह्नीति॥ अग्निवा[illegible]य थमःप्रथमंविदांचकारविदांचक्रुः । वेदनंचेंद्रस्यदेव्युपदेशात् । अन्ययोस्तुइंद्रोपदेशादितिभावेनेंद्रज्ञानोदयप्रकारमाह ॥ त[illegible] द्वाइति ॥ तस्मादित्युक्तंहेतुंव्यनक्ति ॥ सह्येनदिति ॥ एनत् देवं । तद्वाक्यार्थमेवव्यक्तमाह ॥ सह्येनत्प्रथमइति ॥ प्रथ ममित्यर्थः ॥२॥ अधिदैवतमध्यात्मंचोपास्यरूपमुपदिशति ॥ तस्यैषइत्यादिना ॥ तस्यब्रह्मणःएषआदेशः । उपदेशः । यदेतत्कपि लाख्यं(रूपंवि)परंविद्युतः बहुवचनमाद्यर्थेउपलक्षणंवा । विद्युदादीन्तेजोरूपानर्थानासमंताद्व्यद्युतत् । व्यद्योतयत् । आदीपय दिति । आन्यमीमिषत् । सम्यकून्यमीलयत् । आःपूर्णब्रह्माक्षिणीनिमील्यक्षीरसागरेशेतेइतियावत् । आःप्रगृह्यंस्मृतौवाक्येप्या स्तुस्यात्कोपपीडयोरित्यव्ययवर्गेअमरोक्त्याप्रगृह्यसंज्ञिकस्यआइतिनिपातस्यचसत्वेनभाष्येन्यमीमिषदाइत्यत्रप्रगृह्याकारस्यसंध्य भावेनआसमंतादित्येकमर्थमुक्त्वाआइतिपदविभागमाश्रित्यआःपूर्णमित्यर्थउक्तः । इत्येषआदेशःअधिदैवेस्थितस्यतस्येति । इ तिशब्दद्वयस्यपूर्वेणान्वयः । अथेत्यर्थांतरे । अध्यात्मंदेहे । तस्योपदेशउच्यतइत्यर्थः । यदेतन्मनोऽनेनवप्रेरितंसद्गच्छतीवच ।

उप० । तेह्येनत्प्रथमोविदांचकारब्रह्मेति । तस्माद्वाइंद्रोतितरामिवान्यान्देवान् । सह्येनन्नेदिष्ठंपस्पर्श । सह्येनत्प्रथमोविदांचकारब्रह्मेति ॥ २ ॥ तस्यैषआदेशोयदेतद्विद्युतोभिव्यद्युतदा ३ इति । न्यमीमिषदा ३ इत्यधिदैवतं ॥ अथाध्यात्मं ।

सम्यङ्गच्छतिसाकल्येनवस्तुनविषयीकरोति । अनेनैवानिरुद्धाख्येनहरिणायद्विषयजातंउपस्मरति । कीदृशंमनइत्यतउक्तं । अभीक्ष्णंसंकल्पइति । भृशमनेकार्थान्संकल्पयतीतिसंकल्पः । संकल्पकमित्यर्थः । लिंगव्यत्ययश्छांदसः । शब्दस्वभावाद्वा । अभीक्ष्णंनित्यंभृशंसंकल्पश्चभवति । तस्यानिरुद्धस्यहरेरेषउपदेशइत्यर्थः । तस्योपास्त्यर्थमन्वर्थंनामाह । तद्धेति । तद्ब्रह्मतंद्वनं नामततत्वाद्व्याप्तत्वाद्वननीयत्वाद्भजनीयत्वात्तद्वनमितिनामवत् । तनोतेस्त्यजियजितनिभ्योडतिरिरितिडतिप्रत्ययः । वनतेर कारः । तच्चतद्वनंचेतितद्वनमिति । हेतिप्रसिद्धं ॥ ३ ॥ तद्वनमित्युपासकस्यफलमाह सयइति । सप्रसिद्धोधिकारीएतद्ब्रह्मएवं तद्वनमित्येवंरूपेणवेद । एनंतद्वनत्वज्ञानिनंसर्वाणिभूतान्यभिवांछंति । सर्वापेक्षितोभवतीत्यर्थः । एवंश्रुत्वापुनर्ब्रह्माणंपृच्छत्यु मापतिः । उपनिषदंभोब्रूहीति । भोब्रह्मन्उपनिषदंसप्रतिष्ठांसायतनांब्रूहीत्यपृच्छदितिशेषः । किमुपनिषत्प्रतिपाद्यंपृच्छसि । उ तउपनिषदुत्पन्नविद्यायाःअवस्थानकारणं किंवाविद्यायाःकारणमितिहृदिविकल्प्यक्रमेणोत्तरमाह ॥ उक्तातइति ॥ तेतुभ्यंब्रा ह्मींब्रह्मविषयांवावेत्यसंशयं । तउपनिषदंउपनिषत्स्वरूपंअब्रूमअवोचामेतिब्रह्मोवाचेतियोज्यं । ब्रह्मेतिहोवाचेत्यादिनाब्रह्मस्वरू पोक्तेः । तत्रवक्तव्यंकिमपिनेतिभावः । तस्यैतस्याःब्रह्मविद्यायाःतपोदमःकर्मचप्रतिष्ठा । तपःकृच्छ्रचांद्रायणादि । शास्त्रपर्या

उप० । यदेतद्गच्छतीवचमनोनेनैवतदुपस्मरति । अभीक्ष्णंसंकल्पस्तद्धतद्वनंनाम तद्वनमित्युपासितव्यं ॥ ३ ॥ सयएतदेवंवे[illegible] सर्वाणिभूतानिसंवांछंति । उपनिषदंभोब्रूहीति । उक्तातउपनिषत् । ब्राह्मींवावतउपनिषदमब्रूमेति । तस्यैतपोदमःकर्मेतिप्रतिष्ठा ।

लोचनंवा । दमइंद्रियनिग्रहः । कर्मवर्णाश्रमोचितंक्रियानुष्ठानं । प्रतिष्ठाप्रतिष्ठाहेतुः । तपआदिमत्सुविद्याप्रतितिष्ठ[illegible] वेदाःऋगाद्याः । तदनुकूलग्रंथाश्च । शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्यौतिषमितिषडंगरूपसर्वांगानि । सत्यंमीमांस[illegible] तनमुत्पत्तिस्थानं । तस्याइत्यनुषंगः विद्याया इत्यर्थः । एतदुपनिषज्ज्ञानिनःफलमाह । यइति । योधिकारीएतामुपनिषदंवेदस पाप्मानमपहत्यानंतेदेशकालगुणापरिच्छिन्नेस्वर्गेस्वरूपभूतसुखज्ञानात्मकेलोकेप्रकाशरूपेज्येयेश्रेष्ठेब्रह्मणीतियोज्यं । प्रतितिष्ठति प्रतितिष्ठति । द्विरुक्तिःसर्वावधारणार्था ४ ॥ इतिचतुर्थःखंडः ॥ ४ ॥ अनंतगुणपूर्णायदोषदूरायविष्णवे । नमःश्रीप्राणना थायभक्ताभीष्टप्रदायिने ॥ ७ ॥ इतिराघवेंद्रयतिकृततलवकारोपनिषत्खंडार्थःसंपूर्णः ॥ ७ ॥ .

उप० । वेदाःसर्वांगानिसत्यमायतनं यो हवाएतामुपनिषदमेवंवेदापहत्यपाप्मानमनंतेस्वर्गेलोकेज्येयेप्रतितिष्ठतिज्येयेप्रतितिष्ठति ॥ ४ ॥ चतुर्थः खंडः ॥ ४ ॥ इतितलवकारोपनिषत्समाप्ता ॥

अयं ग्रंथः कुंभघोणस्थटी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रकाशितः.
शाकः १८२९ सन १९०७.

नवग्रंथोपसंहारःसमा [illegible] त्याग [illegible]

पूर्णाःप्रत्येकमनवधिक [illegible] ण्यानंतागुणाएवोदारधामस्वरूपंयस

मंदः संख्यापरिमाणाभ्यामनवधिकोयआनंदस्तेनसांद्राय प्रेय

सर्वकर्तृत्वं तदुपपादनायसार्वज्ञंचोक्तं । गुणेष्वानंदस्यफलरूप

गुक्तिः । अनुभूयमानानंदस्योच्चताहेतुत्वाद्वाज्ञानस्यपृथगुक्तिरितिसव

द्दलत्सुतत्वामृतपानयुक्तं ॥ श्रीविठ्ठलाचार्याभिधभूसुरेंद्रंपरंगुरुंमेपितरंन

लितपादपद्मे ॥ स्वानंदसांद्रेरचितांमयेमांरत्नावलींमेगुरवोर्पयंतु ॥ २ ॥ श्र

रचितारत्नमालातिनिर्मला ॥ ३ ॥ इतिश्रीविठ्ठलाचार्यचरणसेविनाश्री

मालायांद्वितीयप्रघट्टकेअष्टमोध्यायः ॥ ८ ॥ ॥

भा० । पूर्णागण्यगुणोदारधाम्नेनित्यायवेधसे ॥ असंदानंदसांद्रायप्रेयसेविष्णवेनमः ॥ ७

विरचितेश्रीमन्महैतरेयोपनिषद्भाष्येद्वितीयप्रघट्टकेअष्टमोध्यायः ॥ ७ ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागरमुद्रणालये मुद्रयित्वा प्रक

॥ ऐतरेयताम्रपर्णीयसं

गुरुकुल कांगड़ी विश्वविद्यालय,
हरिद्वार

पुस्तक लौटाने की तिथि अन्त में अङ्कित है। इस तिथि को पुस्तक न लौटाने पर ~~छै~~ दस नये पैसे प्रति पुस्तक अतिरिक्त दिनों का अर्थदण्ड लगेगा।

15